**QLM 3.1.7**

**संस्थायाम् अधोलिखितांशाः सन्ति–**

1. अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना
2. शोधप्रबन्ध/लघुशोधप्रबन्ध/परियोजनाप्रतिवेदनेषु अनिवार्यमाध्यमत्वेन संस्कृतम्
3. औपचारिक-अनुसन्धान-उपाध्यङ्गतया संस्कृतग्रन्थानां शास्त्रीयग्रन्थानां वाऽनुवादाय प्रोत्साहनम्
4. औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीका/व्याख्यालेखनार्थं प्रोत्साहनम्
5. संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणाय योजना

***Does the Institution has the following –***

1. ***Scheme for preparation of critical edition of unpublished manuscripts for research projects and research degrees***
2. ***Sanskrit as the compulsory medium of writing thesis/dissertation/ Project Report etc.***
3. ***Provision for the translation of Sanskrit/Shastric texts as part of formal research degree?***
4. ***Incentive to write Sanskrit-Teeka-s/commentaries on Sanskrit texts***

5. ***Scheme for production of Study materials in Sanskrit***

***Answer***

1. कमपि विषयविशेषकमाधिकृत्य विस्तृतरूपेण क्रियमाणम् अध्ययनम् विशेषरूपेण नवीनां तथ्यानां पदार्थानां च सूचीबद्धतया अन्वेषणम् परीशीलनम् तथा अनुसंधानमिति कथ्यते। तत्राापि अप्रकाशितानां दुर्लभग्रन्थानाम् अप्रकाशितानां पाण्डुलिपिनां च अनुशीलनात्मक समीक्षात्मकदृष्ट्या च तेषा सम्पादकप्रकाशनादीनां च कार्याणां सम्पादनेन अप्रकाशितानां दुर्लभग्रन्थानां विषयवैशिष्ट्यमं तथा च ग्रन्थकाराणमिपि वैशिष्ट्यानि प्रस्फुटयन्ति। अप्रकाशितानां दुर्लभग्रनीानां सम्यक्तया प्रकाशनेन अज्ञातकर्तृकग्रन्थाः इति अपवादोऽपि न तिष्ठति। एतार्थमेव सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य विविधेषु विभागेषु शोधछात्रैः अप्रकाशितानां दुर्लभग्रन्थानां पाण्डुलिपीनां च अनुशीलनात्मका समीक्षात्मदृष्टया च ग्रन्थसम्पादनानि कार्याणि समापाद्यन्ते। एतदर्थं विश्वविद्यालस्य ग्रन्थालये पाण्डुलिपीनां संरक्षणार्थ विशिष्टाः प्रशिक्षणकार्यशालाः अपि आयोज्यन्ते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये पाण्डुलिपीनां संरक्षणार्थं एकं बृहद् 'सरस्वतीभवनम् ' नामकं भवनम् वर्तते। तत्र संस्कृत तथा वैदिकवाङ्मयश्च अनेकाः पाण्डुलिपयः संरक्षिताः सन्ति। विशेषतः यस्मिन् स्वर्णाक्षरैः 'श्रीमद्भागवद्गीता' अपि अस्ति अथ च विविध-प्राप्तीयलिपि भषासु च आबद्धानाम् पाण्डुलिपीनाम् सहस्राधिक संख्या वर्तते।

तेषु सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य विविधेषु विश्वविद्यलयेषु च शोधच्छात्राणां विषयानुरूपं हस्तलेखानां पाण्डृलिपीनां च शोधकार्यार्थं अनुमन्यते। तदनुसारं शोधछात्राः निर्देशकस्य मार्गदर्शने शोधोपाधि प्राप्नु पाण्डुलिपीनां सम्पादनम्, अनुशीलनम्, परिशीलनम्, तुलनात्मकम्, समीक्षणम् च कुर्वन्ति। विश्वविद्यालये नियुक्ताः आचार्याः सहाचार्याः सहायकाचार्याः अपि पाण्डुलिपीनां दुर्लभग्रन्थानां सम्पादनं कुर्वन्ति। एतदतिरिक्तं राष्ट्रीय-अन्ताराष्ट्रियस्तरेपि शोधार्थिभ्यः शोधसम्पादनार्थं प्रदीयन्ते।

2. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सर्वेषु विभागेषु शोध प्रबन्धाः लघुशोधप्रबन्धाः संस्कृतपरियोजना अथ च शोध पत्रिका सर्वेपि संसकृतमाध्यमेनैव भवन्ति। सन् 2018 तः 2023 पर्यन्तं पञ्चसु वर्षेषु सहस्त्राधिक संख्याकाः शोधप्रबन्धाः संस्कृतभाषामाध्यमेनैवविरचिताः सन्ति। इदं सम्पूर्णानन्दसंस्कृत विश्वविद्यालयस्य शोधपरिनियमावल्या अपि स्पष्टरूपेण वर्णितम् अस्ति। अतः विश्वविद्यालयस्य शोधप्रबन्धाः लघुशोधप्रबन्धाः शोधपत्रिकायाः प्रकाशनम् , शोधपत्राणि लेखनं संस्कृतमाध्यमेन एव भवति। शिक्षाशास्त्रिच्छात्राणां कुते अपि संस्कृतसंभाषण कार्यक्रमः आयोज्यन्ते।

3. सम्पूर्णाननद संस्कृतविश्वविद्यालये संस्कृत/वैदिकग्रन्थानां शोधकार्यत्वेन अनुवादार्थमपि अवसरो दीयते। ये ग्रन्थाः अति प्राचीनाः प्रौढशैल्यां बद्धाः सन्ति तेषां सरलतया बोधनाय सरलमानकसंस्कृत भाषायाम् अनुवादमपि क्रियन्ते। इत्यादिषु विश्वविद्यालयस्य शोधछात्राः विविधास्यु लिपिषु यथा शारदा,ब्राह्मी आबद्धानां तादग्रनीानां देवनागर्यां अनुवादं कृत्वा लिखन्ति।

विश्वविद्यालय शोधछात्राः विविध प्रान्तीयभाषासु निबद्धनाम् संस्कृतावैदिकग्रन्थे प्राप्त मूल प्रतीमां अनुवादकार्य कृत्वा सम्पादनम् अपि कुर्वन्ति। एतदर्थं छात्राणां कृते विद्यावारिधिः इति उपाधिः प्रदीयन्ते।

4. टीकोपटीकाः व्याख्याश्च संस्कृत वाङ्मयस्य सूत्रभाष्यवार्तिकानि जीवभूतानि तत्त्वानि सन्ति। सम्पूर्णानन्द संस्कृतविश्वविद्यालये प्रधानतयः द्वाविंशति विभागाः शास्त्राणां शिक्षण-प्रशिक्षणार्थं सन्ति। अतः आचार्याः सहाचार्याः, सहायकाचार्याश्च सर्वेपि टीका-व्याख्यालेखनाय प्रतिपदं मार्गदर्शनं कुर्वन्ति। विश्वविद्यालीयैः शास्त्रज्ञैः शिक्षकैः स्वयमपि 'विद्यावारिधि' इति उपाधि लाभाय शास्त्रीयाः टीकाग्रन्थाः विरचिताः। एतादृशाः विद्वत्पूर्णाः टीकाग्रन्थाः प्रकाशिताः सन्ति विश्वविद्यालय प्रकाशनेन। विश्वविद्यालयीय विभागानां शोधछात्राः अपि दुर्लभानां अप्रकाशितानां टीकाग्रन्थानां सम्पादनं कृत्वा पुरातनान् टीकाग्रन्थकारान् पुनरोद्धारयतिः।

5. सम्पूर्णानन्द संस्कृतविश्वविद्यालये संस्कृतभाषामाध्यमेन अनेकानि अध्ययनाध्यापनसामग्री निर्माण योजनानि सन्ति। अत्र विश्वविद्यालयीयैः अध्यापकैः अपि बहवः पठन-पाठनसामग्रयः सङ्कलनं कुर्वन्ति। विश्वविद्यालयस्य प्रकाशन विभाग द्वारा 'सारस्वती सुषमा' नामकी संस्कृतपत्रिकाः प्रकाशमानाः अस्ति। तस्या अध्ययनाध्यापन सामग्री रुपेण प्रयुज्यन्ते। अतः संस्कृतानुरागिणः क्लेशं बिना संस्कृतमाध्यमेन एवं संस्कृतशिक्षाम् प्राप्तुं सौख्यमनुभवन्ति।